# देशभक्तः चन्द्रशेखरः

(प्रथमं दृश्यम्)

**(स्थानम्** : वाराणसीन्यायालयः, न्यायाधीशस्य पीठे एकः दुर्घर्षः पारसीकः तिष्ठति, आरक्षकाः चन्द्रशेखरं तस्य सम्मुखम् आनयन्ति। अभियोगः प्रारभते। चन्द्रशेखरः, पुष्टाङ्ग, गौरवर्णः षोडशवर्षीयः किशोरः।

**आरक्षकः** : श्रीमन् ! अयम् अस्ति चन्द्रशेखरः। अयं राजद्रोही। गतदिने अनेनैव असहयोगिनां सभायां एकस्य आरक्षकस्य दुर्जयसिंहस्य मस्तके प्रस्तरखण्डेन प्रहारः कृतः येन दुर्जयसिंहः आहतः।

**न्यायाधीशः** : *(तं बालकं विस्मयेन विलोकयन्)* रे बालक ! तव किं नाम?

**चन्द्रशेखरः** : आजादः *(स्थिरीभूय)* ।

**न्यायाधीशः** : *(स्वगतम्)* कीदृशः प्रमत्तः स्वतंत्रतायै अयम्? *(प्रकाशम्)* अतीव धृष्टः, उद्दण्डश्चायं नवयुवकः। अहम् इमं पंचदश कशाघातान् दण्डयामि।

**चन्द्रशेखरः** : नास्ति चिन्ता।

Scanned by TapScanner

(द्वितीयं दृश्यम्)

*(ततः दृष्टिगोचरौ भवतः कौपीनमात्रावशेषः, फलकेन दृढं वद्धः चन्द्रशेखरः, कशाहस्तेन चाण्डालेन अनुगम्यमानः, कारावासाधिकारी गण्डासिंहश्च।)*

**गण्डासिंहः** : *(चाण्डालं प्रति)* दुर्मुख ! मम आदेशसमकालमेव कशाघातः कर्त्तव्यः। *(चन्द्रशेखरं प्रति)* रे दुर्विनीत युवक ! लभस्व इदानीं स्वाविनयस्य फलम्। कुरु राजद्रोहम्। दुर्मुख ! कशाघातः एकः *(दुर्मुखः चन्द्रशेखरं कशया ताडयति।)*

**चन्द्रशेखरः** : जयतु भारतम्।

**गण्डासिंहः** : दुर्मुख! द्वितीय कशाघातः।
*(दुर्मुखः पुनः ताडयति।)*
ताडितः चन्द्रशेखरः पुनः पुनः 'भारतं जयतु' इति वदति।
*(एवं स पंचदशकशाघातैः ताडितः)*
यदा चन्द्रशेखरः कारागारात् मुक्तः बहिः आगच्छति, तदैव सर्वे जनाः तं परितः वेष्टयन्ति, बहवः बालकाः तस्य पादयोः पतन्ति, तं मालाभिः अभिनन्दयन्ति च।

**चन्द्रशेखरः** : किमिदं क्रियते भवद्भिः? वयं सर्वे भारतमातुः अनन्यभक्ताः। तस्याः शत्रूणां कृते मदीयाः इमे रक्तबिन्दवः अग्निस्फुलिङ्गाः भविष्यन्ति।

**('जयतु भारतम्' इति उच्चैः कथयन्तः सर्वे गच्छन्ति)**

Scanned by TapScanner